ईशावास्योपनिषद् ।

महर्षिस्वामि दयानन्दभाष्यसहिता, गुर्जरभाषानुवाद-

संवलिता ।

श्यामजी विश्राम शर्मणा.

मोहमय्यां

"निर्णयसागराख्य" मुद्रणयन्त्रालये मुद्रयित्वा

मित्र: संस्मरणाय वैदिकधर्मानुरागिभ्य

उपायनीकृता ।

संवत् १९५६ आ० शु० १५

ईशावास्योपनिषद्

महर्षिस्वामि दयानन्दभाष्यसहिता, गूर्जरभाषानुवाद

संवलिता ।

शामजी विश्राम शर्मणा

मोहमय्यां

"निर्णयसागराख्य" मुद्रणयन्त्रालये मुद्रयित्वा

पितुः संस्मरणाय वैदिकधर्मानुरागिभ्यः

उपायनीकृता ।

संवत् १९५६ आ. शु. १५

स्वर्गवासी नंदवाणा वोरा विश्राम वसनजी.



जन्म सं० १८८१ कार्तिक कृष्णपक्ष ३ भोम.

मरण सं० १९५४ माहा कृष्णपक्ष ९ भोम.

प्रस्तावना.

ईशावास्योपनिषद् एटले शुक्लयजुर्वेदनो ४० मो अध्याय. एनाउपर शंकराचार्यप्रभृति घणा विद्वानोनां संस्कृतभाषामां भाष्यो थयां छे, तेमज गुजराती मराठी इंग्लिश इत्यादि भाषाओमां पण एनां भाषान्तरो थई चूक्यां छे. घउं एकज छतां जेम तेना जुदा जुदा पदार्थो बने छे अने तेमनो स्वाद पण भिन्न भिन्न होय छे, तेमज भिन्नरुचिवाळा लोकोने आ एकज उपनिषद् उपरनां जुदां जुदां भाष्यो अने भाषान्तरो विद्याविनोदने माटे घणांज उपयुक्त थई पड्यां छे. तेमां वळी आ सदीना धार्मिक सुधाराना अग्रेसर, वैदिकधर्मना पुनरुद्धारक **स्वामी दयानन्दसरस्वतीए** आखा शुक्लयजुर्वेदउपर विद्वत्ता अने अनन्यसाधारण बुद्धिमत्ताथी भरेलुं भाष्य केवल संस्कृतभाषामांज नथी पण वेद जेवा गहन पुस्तकनो प्रचार सामान्य देशी भाषा जाणवावाळा लोकोमां पण थाय एवी धारणाथी संस्कृत अने हिन्दी आ बे भाषामां कर्युं छे. शुक्लयजुर्वेदनुं स्वामीजीनुं भाष्य मारा वाचनमां आव्या पछी मारो एवो विचार थयो के स्वामीजीनी मधुर अने हितकर वेदवाणीनो थोडोघणो प्रसाद आपणा गुर्जर भाईओने पण मळे तो ठीक. माटे में ईशावास्योपनिषद्नुं स्वामीजीना भाष्यनुं गुजराती भाषान्तर करी अमारा मित्र महाशय शामजी विश्रामशर्मा एमने अर्पण कर्युं, अने तेओए पोताना स्वर्गवासी पिता **विश्राम वसनजीनी** यादगीरी माटे आ भाष्य छपावी आपणा वैदिकधर्मानुयायी बन्धुवर्गने अर्पण कर्युं छे.

पुस्तकना प्रथम पृष्ठउपर जे प्रतिकृति (फोटो) आपी छे ते स्वर्गवासी महाशय भाई विश्राम वसनजीनी छे आ सद्गृहस्थ स्वामीश्री दयानन्द सरस्वतीना परमभक्त तेमज तेमना सदुपदेशथी वैदिक धर्मनी उन्नतीने माटे तन मन धनथी प्रयत्न करवावाळा हता. एटलुंज नहीं परन्तु पोते नित्य स्नान—संध्या अग्निहोत्रादि विधि करी एकाग्र अन्तःकरणथी कुशासन उपर बेसी नित्य नियमपूर्वक उपनिषदोनुं अध्ययन प्रेमपूर्वक करता हता. माटे उपनिषद्विद्यानो प्रचार एज एवा भद्रपुरुषनुं स्मारक होवुं जोईए एम समजी आ उपनिषद्नुं प्रथमपुस्तक तेमना स्मरणार्थे आपना हाथमां आपवामां आवे छे.

नित्य उपनिषद्विद्यानुं अध्ययन करवुं ए आपणो परमधर्म समजी जो आप महाशयो नित्य आ पुस्तकनुं पठनपाठन करशो तो मारो प्रथम प्रयत्न सफल थयो एम मानीश. मारी जन्मभाषा गुजराती नथी तेथी भूलचूक थई होय ते क्षमा करशो

इत्याशास्ते भवदीयो

नरहरिशर्मा.

स्वर्गवासी परमपूज्य विश्राम वसनजी के जे पुरुषनी प्रेरणाथी तेमना सुपुत्र श्यामजी विश्रामे आ उत्तम ग्रंथनुं भाषांतर करावी तेने प्रसिद्धिमां लाववानो प्रयत्न कर्यो छे ते पुरुषनेमाटे रा. रा. वैद्यकवि दुर्लभदास श्यामजी ध्रुवे रचेली कविता.

शार्दूलविक्रीडित

रूडुं काश्यपगोत्र वेद यजुनी शाखा सुमाध्यंदिनी;
घोरानी अवटंक शुद्ध पकडी जेणे प्रभा आदिनी;
वर्णे ब्राह्मण लेश याचक नहीं, विश्राम जाणे मणी;
पाम्या ए शुभ जन्म जाति जगमां, जे नंदवाणा तणी.

गीति.

अढारसें एक्याशी, कार्तिक वदि त्रीज भोमे जन्म्या,
ओगणीसें चोपनना, माघवदि नवमी भोमे विरम्या.

मनहर.

नित्य संध्या अग्निहोत्र वैश्वदेव तणो कम,
करीने आळस कदी तेओ नहीं त्यागता;
ब्रह्मयज्ञरूपे पाठ उपनिषदोनो करी,
सर्व प्राणीतणुं श्रेय मुख थकी मागता;
वेदधर्मनी उन्नति आर्योनी प्राचीनरीति,
प्रति प्रीति अति धरी उर अनुरागता;
कर्यो स्वर्गवास तोय हजी हुं हैयात देखुं,
सत्कृतिरूपे रह्या ए जगतमां जागता.
तनमनधनवडे उत्तेजन आपी इच्छे
उदय अलभ्य सभ्य जनोना विचारनो;
पठनपाठनविधि पूर्वनी विशेष प्यारी,
धिक्कार अपार उरे पाखंडी प्रचारनो;
वृद्ध हता तोय व्हेमी वृद्ध जेवा हता नहीं,
समजता खरो मर्म सार ने असारनो;
पूज्यस्वामी दयानंद वाणीना प्रभाव वडे,
आर्यो धर्म धीरताथी परमप्रकारनो.

दोहरो.

समर्थ सरजनहार ओ, धरणीना धरनार,
एवा नरने आपजो, शांति स्वर्गमो सार.

ओ ३ म्

आर्यसमाजके नियम.

१ सबसत्यविद्या और जो पदार्थ विद्यासे जाने जाते हैं उन सबका आदिमूल परमेश्वर है.

२ ईश्वर सच्चिदानंदस्वरूप, निराकार, सर्वशक्तिमान्, न्यायकारी दयालु, अजन्मा, अनंत, निर्विकार, अनादि, अनुपम, सर्वाधार सर्वेश्वर, सर्वव्यापक, सर्वान्तर्यामी, अजर, अमर, अभय, नित्य पवित्र, और सृष्टिकर्ता है इसीकी उपासना करनी योग्य है.

३ वेद सत्यविद्याओंका पुस्तक है वेदका पढना पढाना और सुनना सुनाना सब आर्योंका परमधर्म है.

४ सत्य ग्रहण करने और असत्यके छोडनेमें सर्वदा उद्यत रहना चाहिये.

५ सब कामधर्मानुसार अर्थात् सत्य और असत्यको विचार करके करना चाहिये.

६ संसारका उपकार करना इस समाजका मुख्य उद्देश्य है. अर्थात् शारीरिक आत्मिक और सामाजिक उन्नति करना.

७ सबसे प्रीतिपूर्वक धर्मानुसार यथायोग्य वर्तना चाहिये.

८ अविद्याका नाश और विद्याकी वृद्धी करनी चाहिये.

९ प्रत्येकको अपनी उन्नतीसे संतुष्ट न रहना चाहिये. किन्तु सबकी उन्नतीमे अपनी उन्नती समजनी चाहिये.

१० सब मनुष्योंको सामाजिक सर्व हितकारी नियम पालनेमें परतंत्र रहना चाहिये और प्रत्येक हितकारी नियममें स्वतंत्र रहे.

ओ ३ म्।

अथ चत्वारिंशोऽध्यायः।

विश्वानि देव सवितर्दुरितानि परा सुव यद्भद्रं तन्न आ सुव ॥१॥

ईशावास्यमित्यस्य दीर्घतमा ऋषिः, आत्मादेवता, अनुष्टुप् छन्दः, धैवतः स्वरः ॥

अथ मनुष्याः परमात्मानं विज्ञाय किङ् [illegible]

गुजराती—हवे ४० मा अध्यायनो आरंभ छे एना पहेला मंत्रमां माणसोए ईश्वरने जाणीनें शुंकरवुं जोईये आविषयपर कहेछे.

ईशा वास्यमिदꣳसर्वं
यत्किञ्च जग[illegible]
तेन त्यक्तेन [illegible]
मा गृधः कस्य [illegible]म् ॥ १ ॥

पदानि—ईशा, वास्यम्, इदम्, सर्वम्, यत्, किम्, च, जगत्याम्, जगत्, तेन, त्यक्तेन, भुञ्जीथाः, मा, गृधः, कस्य, स्वित्, धनम्, ॥ १ ॥

पदार्थः—(ईशा) ईश्वरेण सकलैश्वर्यसंपन्नेन सर्वशक्तिमता परमात्मना. (वास्यम्) आच्छादयितुं योग्यं सर्वतोऽभिव्याप्यम्. (इदम्) प्रकृत्यादि पृथिव्यन्तम्. (सर्वम्) अखिलम्. (यत्) (किम्) (च) (जगत्याम्) गम्यमानायां सृष्टौ (जगत्) यत् गच्छति तत् (तेन) (त्यक्तेन) वर्जितेन तच्चित्तरहितेन (भुञ्जीथाः) भोगमनुभवेः (मा) निषेधे (गृधः) अभिकांक्षीः (कस्य) (स्वित्) कस्यापि स्विदिति प्रश्ने वा (धनम्) वस्तुमात्रम् ॥ १ ॥

अन्वयः—(हे मनुष्य त्वम्) यदिदं सर्वं जगत्यां जगत् ईशा वास्यम् (अस्ति) तेन त्यक्तेन भुञ्जीथाः किंच कस्य स्वित् धनं मा गृधः ॥ १ ॥

भावार्थः—ये मनुष्या ईश्वराद्बिभ्यति अयमस्मान् सर्वदा सर्वतः पश्यति जगदिदमीश्वरेण व्याप्तं सर्वत्रेश्वरोस्तीति व्यापकमन्तर्यामिणं निश्चित्य कदाचिदप्यन्यायाचरणेन कस्यापि किञ्चिदपि द्रव्यं ग्रहीतुं नेच्छेयुः ते धार्मिका भूत्वा अत्र परत्राभ्युदयनिःश्रेयसे फले प्राप्य सदा नन्देयुः ॥ १ ॥

गुजराती अन्वितार्थ—हे माणस तुं (यत्) जे (इदम्) प्रकृतीथी लई पृथिवीपर्यन्त (सर्वं) बधुं (जगत्याम्) प्राप्त थवालायक एवी सृष्टीमां (जगत्) चराचर प्राणिमात्र (ईशा) संपूर्ण ऐश्वर्यथी युक्त सर्व शक्तिमान् परमात्माथी (वास्यम्) आच्छादन करवालायक अर्थात् चोतरफथी व्याप्त थवालायक छे (तेन) ते (त्यक्तेन) त्याग करेला जगतना योगेकरी (भुञ्जीथाः) पदार्थोना उपभोगनो अनुभव ले, परन्तु (कस्यस्वित्) कोईनीपण (धनम्) वस्तुमात्रनी (मागृधः) अभिलाषा म कर ॥ १ ॥

गुजराती भावार्थ—जे माणसो ईश्वरथी बीये छे के ए ईश्वर अमने हमेशा चोतरफथी जुए छे, आ जगत् ईश्वरे व्यापेलुं छे, अर्थात् ईश्वर बधे ठेकाणे विद्यमान् छे, एवी रीते व्यापक अन्तर्यामी परमात्मानो निश्चय करी कोई पण वखते अन्यायाचरणथी कोईनुं कांईपण द्रव्य लेवाने चाहता नथी ते माणसो धर्मात्मा थई आलोकनुं सुख तथा परलोकमां मुक्तिरूपी सुखने मेळवी हमेश आनंदमां रहेछे ॥ १ ॥

कुर्वन्नित्यस्य दीर्घतमाऋषिः, आत्मादेवता, भूरिगनुष्टुप् छन्दः, धैवतः स्वरः ॥

अथ वैदिककर्मणः प्राधान्यमुच्यते.

गुजराती—हवे वेदोक्तकर्मनी उत्तमताविषे कहेछे.

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳसमाः
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ २ ॥

पदानि—कुर्वन्, एव, इह, कर्माणि, जिजीविषेत्, शतम्, समाः, एवं, त्वयि, न, अन्यथा, इतः, अस्ति, न, कर्म, लिप्यते, नरे ॥ २ ॥

पदार्थः—(कुर्वन्) (एव) (इह) अस्मिन् संसारे (कर्माणि) धर्म्याणि वेदोक्तानि निष्कामकृत्यानि, (जिजीविषेत्) जीवितुमिच्छेत् (शतं)

(समाः) संवत्सरान् (एवं) अमुना प्रकारेण (त्वयि) (न) निषेधे (अन्यथा) (इतः) अस्मात् प्रकारात्. (अस्ति) भवति (न) निषेधे (कर्म) अधर्म्यमवैदिकं मनोर्थसम्बन्धि (लिप्यते) (नरे) नयनकर्त्तरि ॥ २ ॥

अन्वयः—(मनुष्य) इह कर्माणि कुर्वन्नेव शतं समाः जिजीविषेत्, एवं (धर्म्ये कर्मणि प्रवर्तमाने) त्वयि नरे कर्म न लिप्यते इतः अन्यथा नास्ति (लेपाभावः) ॥ २ ॥

भावार्थः—मनुष्याः आलस्यं विहाय, सर्वस्य द्रष्टारं न्यायाधीशं परमात्मानं कर्तुमर्हां तदाज्ञांच मत्वा, शुभानि कर्माणि कुर्वन्तः, अशुभानि त्यजन्तः, ब्रह्मचर्येण विद्यासुशिक्षे प्राप्य, उपस्थेन्द्रियनिग्रहेण वीर्यमुन्नीय, अल्पमृत्युं घ्नन्तु, युक्ताहारविहारेण च शतवार्षिकमायुः प्राप्नुवन्तु. यथा यथा मनुष्याः सुकर्मसु चेष्टन्ते तथा तथा पापकर्मतो बुद्धिर्निवर्तते, विद्या आयुः सुशीलता च वर्धते ॥ २ ॥

गुजराती अन्वितार्थ—मनुष्य (इह) आ संसारमां (कर्माणि) धर्मयुक्त वेदोक्त निष्काम कर्मोने (कुर्वन्) करतो हवो (एव) ज (शतं) सो (समाः) वर्षलगण. (जिजीविषेत्) जीववानी इच्छा करे. (एवं) एवी रीते धर्मयुक्त कर्म करवावाळो एवो जे (त्वयि) तूं (नरे) व्यवहारोनें चलाववावाळा जीवननी इच्छा धारण करे छे ते तारामां (कर्म) अधर्मयुक्त अवैदिक काम्यकर्म (न) नथी (लिप्यते) लिप्त होतुं (इतः) एना करतां (अन्यथा) बीजा प्रकारथी कर्म लेपनो अभाव (न अस्ति) थतो नथी ॥ २ ॥

गुजराती भावार्थ—माणसो ए आलस्यने तजी, सौने जोवावाळा न्यायाधीश परमात्माने तेमज करवा योग्य एवी तेनी आज्ञाने मान आपी, सारां कामो करवां. अने नरसां कामो तजवां. ब्रह्मचर्यथी विद्या अने सुशिक्षाने प्राप्त करी, उपस्थेन्द्रियना निग्रहथी पराक्रमने वधारी, अल्पवयमां थता मरणने अटकाववुं. अने युक्त आहारविहारथी सो वर्ष लगीनी आयुष्यने प्राप्त करी लेवुं. जेम जेम माणसोनी प्रवृत्ति सारां कामोमां थाय छे तेम तेम पापकर्मथी बुद्धि निवृत्त थती जाय छे, अने विद्या आयुष्य अने सुशीलता वधे छे ॥ २ ॥

असुर्या इत्यस्य दीर्घतमा ऋषिः, आत्मादेवता, अनुष्टुप् छन्दः, गांधारः स्वरः ॥

अथात्महन्तारो जनाः कीदृशा इत्याह.

गुजराती—हवे आत्मानुं हनन करवावाळा अर्थात् आत्माने भूली गयेला माणसो केवा होय छे ते विषे कहे छे.

असुर्या नाम ते लोका अंधेन तमसावृताः
तांस्ते प्रेत्यापि गच्छन्ति ये के चात्महनो जनाः ३

पदानि—असुर्याः, नाम, ते, लोकाः, अन्धेन, तमसा, आवृताऽइत्याऽवृताः, तान्, ते, प्रेत्येति प्रऽइत्य, अपि, गच्छन्ति, ये, के, च, आत्महनऽइत्यात्मऽहनः, जनाः ॥ ३ ॥

पदार्थः—(असुर्याः) असुराणां प्राणपोषणतत्पराणां अविद्यादियुक्तानां इमे सम्बन्धिनः तत्सदृशः पापकर्माणः (नाम) प्रसिद्धौ (ते) (लोकाः) ये लोकन्ते पश्यन्ति ते जनाः (अंधेन) अन्धकाररूपेण (तमसा) अज्ञावरकेण (आवृताः) समन्ताद्युक्ता आच्छादिताः (तान्) दुःखान्धकारावृतान् भोगान् (ते) (प्रेत्य) मरणं प्राप्य (अपि) जीवन्तोपि (गच्छन्ति) प्राप्नुवन्ति (ये) (के) (च) (आत्महनः) ये आत्मानं घ्नन्ति तद्विरुद्धमाचरन्ति ते (जनाः) मनुष्याः ॥ ३ ॥

अन्वयः—(ये) लोका अन्धेन तमसा आवृताः, ये केच आत्महनो जनाः (सन्ति) ते असुर्यानाम, ते प्रेत्यापि तान् गच्छन्ति ॥ ३ ॥

भावार्थः—त एव असुरा दैत्या राक्षसाः पिशाचा दुष्टा मनुष्याः, य आत्मन्यन्यद्वाच्यन्यत्कर्मण्यन्यदाचरन्ति. ते न कदाचित् अविद्यादुःखसागरादुत्तीर्य आनन्दं प्राप्तुं शक्नुवन्ति, येच यदात्मना तन्मनसा, यन्मनसा तद्वाचा, यद्वाचा तत्कर्मणा अनुतिष्ठन्ति, त एव देवा आर्याः सौभाग्यवन्तः अखिलं जगत् पवित्रयन्तः इहामुत्र अतुलं सुखमश्नुवते ॥ ३ ॥

गुजराती अन्वितार्थ—जे (लोकाः) जोवावाळा लोको (अन्धेन) अंधकाररूपी (तमसा) ज्ञानने आच्छादन करवावाळा अज्ञानथी (आवृताः) चो तरफथी ढंकाई गयेला छे (ये, के, च) अने जे कोई (आत्महनः) आत्माथी विरुद्ध एवुं आचरण करवावाळा (जनाः) माणसो छे (ते) ते (असुर्याः) पोतानाज प्राणोनुं पोषण करवामां तत्पर, अविद्यादि दोषोथी युक्त, एवा जे लोको छे तेमनीज जातना जाणवा. अर्थात् ए लोकोनी माफक पापकर्म करवावाळा (नाम) प्रसिद्ध छे. (ते) ते माणसो (प्रेत्य) मूवा पछी (अपि) अने जीवे छे त्यां लगण पण (तान्) ते जे दुःख अने अज्ञानरूपी अंधकारथी युक्त एवा भोगो छे तेमने (गच्छन्ति) प्राप्त थाय छे ॥ ३ ॥

गुजराती भावार्थ—तेज दुष्ट मनुष्यो असुर, दैत्य, राक्षस तथा पिशाच कहेवाय, के जेमना मनमां एक, वाणीमां बीजूं अने आचरणमां त्रीजूंज होय ते माणसो कोई वखते पण अविद्यारूपी दुःखसागर मांहेथी पार पडी आनंदने मेळवी शकता नथी. परन्तु जे माणसो जे आत्मामां होय तेज मनथी जाणे छे, जे मनथी जाणे छे तेज वाणीथी बोले छे, अने जे वाणीथी बोले छे तेज आचरणथी करी देखाडे छे, तेज देव, तेज आर्य, तेज भाग्यशाळी, तेज आखी दुनियाने आपणा चरित्रथी पवित्र करवावाळा. तेमनेज आ लोकमां तथा परलोकमां अपरिमित सुख मळेछे ॥ ३ ॥

अनेजदित्यस्य दीर्घतमाऋषिः। ब्रह्मदेवता, निचृत्त्रिष्टुप् छन्दः, धैवतः स्वरः ॥

कीदृशो जन ईश्वरं साक्षात्करोतीत्याह.

गुजराती—केवा माणसोने ईश्वरनो साक्षात्कार थाय छे ते विशे कहे छे.

अनेजदेकं मनसो जवीयो
नैनद्देवा आप्नुवन् पूर्वमर्षत्
तद्धावतोऽन्यानत्येति तिष्ठत्
तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥

पदानि—अनेजत्, एकं, मनसः, जवीयः, न, एनत्, देवाः, आप्नुवन्, पूर्वम्, अर्षत्, तत्, धावतः, अन्यान्, अति, एति, तिष्ठत्, तस्मिन्, अपः, मातरिश्वा, दधाति ॥४॥

पदार्थः—(**अनेजत्**) न एजते कम्पते तत् अचलत् स्वावस्थायाश्च्युतिः कम्पनं तद्रहितं (**एकं**) अद्वितीयम् ब्रह्म, (**मनसः**) मनोवेगात् (**जवीयः**) अतिशयेन वेगवत् (**न**) (**एनत्**) (**देवाः**) चक्षुरादीनीन्द्रियाणि वा (**आप्नुवन्**) प्राप्नुवन्ति (**पूर्वम्**) पुरःसरं पूर्णम् (**अर्षत्**) गच्छत् (**तत्**) (**धावतः**) विषयान् प्रतिपततः (**अन्यान्**) स्वस्वरूपाद्विलक्षणान् मनोवागिन्द्रियादीन् (**अति**) उल्लंघने (**एति**) प्राप्नोति गच्छति (**तिष्ठत्**) स्वस्वरूपेण स्थिरं सत् (**तस्मिन्**) सर्वत्राभिव्यासे (**अपः**) कर्म क्रियां वा (**मातरिश्वा**) मातरि अन्तरिक्षे श्वसिति प्राणान् धरति वायुस्तद्वद्वर्तमानो जीवः (**दधाति**) ॥ ४ ॥

अन्वयः—(हे विद्वांसो मनुष्याः यत्) एकं अनेजत् मनसः जवीयः पूर्वं अर्षत् (ब्रह्म अस्ति) एनत् देवाः न आप्नुवन्, तत् (स्वयं) तिष्ठत् (सत् स्वानन्तव्याप्त्या) धावतः अन्यान् अत्येति तस्मिन् (स्थिरे सर्वत्र अभिव्याप्ते) मातरिश्वा (वायुरिव जीवो) अपः दधाति (इति विजानीत)॥४॥

भावार्थः—ब्रह्मणोऽनन्तत्वात् यत्र यत्र मनो याति तत्र तत्र पुरस्तादेवाभिव्याप्तं अग्रस्थं ब्रह्म वर्तते, तद्विज्ञानं शुद्धेन मनसैव जायते. चक्षुरादिभिः अविद्वद्भिश्च द्रष्टुमशक्यमस्ति. स्वयं निश्चलं सत् सर्वान् जीवान् नियमेन चालयति धरतिच. तस्य अतिसूक्ष्मत्वात् अतीन्द्रियत्वाच्च धार्मिकस्य विदुषो योगिन एव साक्षात्कारो भवति नेतरस्य ॥ ४ ॥

गुजराती अन्वितार्थ—हे विद्वान् माणसो जे (एकं) अद्वितीय. (अनेजत्) अचल अर्थात् स्वस्वरूपथी च्युत न थवावाळुं (मनसः) मनना वेग करतां पण (जवीयः) वधारे वेगवाळुं (पूर्वं) पूर्वे (अर्षत्) चालतुं एवुं अर्थात् ज्यां कोई चाली जाय त्यां सर्वव्यापक होवाथी पूर्वेथीज रहेलुं एवुं ब्रह्म छे. (एनत्) आब्रह्मने (देवाः) चक्षुरादि इन्द्रियो (नआप्नुवन्) प्राप्त थता नथी (तत्) ते परब्रह्मपोते (तिष्ठत्) जोके चालतु नथी अर्थात् स्वस्वरूपथी स्थिर होयछे तोए पोतानी अनन्त व्यापकताथी (धावतः) विषयों तरफ दोडता एवा (अन्यान्) स्वस्वरूपथी विलक्षण एवा जे मन वाणी इन्द्रिय इत्यादिक छे तेमने (अत्येति) उल्लंघन करी जायछे (तस्मिन्) स्थिर सर्वव्यापक एवा परब्रह्ममां (मातरिश्वा) अन्तरिक्षमां प्राणोनुं धारण करवावाळो जे वायु छे तत्सदृश जीवात्मा (अपः) कर्म अथवा क्रियाने (दधाति) धारण करे छे एम समजो. ॥ ४ ॥

गुजराती भावार्थ—ब्रह्म अनन्त होवाथी ज्यां ज्यां मन जायछे त्यां त्यां पहेलेथीज ते पोतानी व्यापकताथी रहेलुं छे. तेनुं विज्ञान शुद्ध मनथीज थायछे. चक्षुरादि इन्द्रियो तेमज अविद्वान् पुरुषो तेने जोई शकता नथी. ते ब्रह्म पोते निश्चल छतां बधा जीवोने नियमपूर्वक चलावेछे अने धारण करेछे. ते ब्रह्म अतिसूक्ष्म अने अतीन्द्रिय होवाथी धार्मिक विद्वान् योगिओनेच तेनो साक्षात्कार थायछे इतरोने थतो नथी. ॥ ४ ॥

तदेजतीत्यस्य दीर्घतमा ऋषिः, आत्मादेवता निचृदनुष्टुप् छन्दः, गांधारः स्वरः ॥

विदुषं निकटे अविदुषां च ब्रह्म दूरेऽस्तीत्याह.

गुजराती—ब्रह्म विद्वानोनी पासेछे अने अविद्वानोथी छेटेछे एम कहेछे.

तदेजति तन्नैजति तद्दूरे तद्वन्तिके

तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ ५ ॥

पदानि—तत्, एजति, तत्, न, एजति, तत्, दूरे, तत्, ऊँऽइत्यूँ, अन्तिके, तत्, अन्तः, अस्य, सर्वस्य, तत्, ऊँऽइत्यूँ, सर्वस्य, अस्य, बाह्यतः ॥ ५ ॥

पदार्थः—(तत्) (एजति) कंपते चलति मूढदृष्टया (तत्) (न) (एजति) कम्पते कम्प्यते वा (तत्) (दूरे) अधर्मात्मभ्योऽविद्वद्भ्योऽयोगिभ्यः (तत्) (उ) (अन्तिके) धर्मात्मनां विदुषां योगिनां समीपे (तत्) (अन्तः) अभ्यन्तरे (अस्य) (सर्वस्य) अखिलस्य जगतो जीवसमूहस्य वा (तत्) (उ) (सर्वस्य) समग्रस्य (अस्य) प्रत्यक्षाप्रत्यक्षात्मकस्य (बाह्यतः) बहिरपि वर्तमानं ॥ ५ ॥

अन्वयः—(हे मनुष्याः) तत् (ब्रह्म) एजति, तत् न एजति, तत् दूरे, तत् उ अन्तिके, तत् अस्य सर्वस्य अन्तः, तत् उ सर्वस्य अस्य बाह्यतः (वर्तते इति निश्चिनुत) ॥ ५ ॥

भावार्थः—हे मनुष्याः तत् ब्रह्म मूढदृष्टौ कम्पत इव, तत् स्वतो व्यापकत्वात् कदाचिन्न चलति, ये तदाज्ञाविरुद्धाः ते इतस्ततो धावन्तोऽपि तन्न विजानन्ति. ये च ईश्वराज्ञानुष्ठातारः ते स्वात्मस्थं अतिनिकटं ब्रह्म प्राप्नुवन्ति. यत् ब्रह्म सर्वस्य प्रकृत्यादेः बाह्याभ्यन्तरावयवान् अभिव्याप्य सर्वेषां जीवानां अन्तर्यामिरूपतया सर्वाणि पापपुण्यात्मकानि कर्माणि विजानत् याथातथ्यं फलं प्रयच्छति एतदेव सर्वैर्ध्येयं, अस्मादेव सर्वैर्भेतव्यमिति ॥ ५ ॥

गुजराती अन्वितार्थ—हे माणसो (तत्) ते ब्रह्म (एजति) मूर्खाओनी दृष्टीथी चलायमान थायछे (तत्, न, एजति) परन्तु खरेखर ते चलायमान थतुं नथी. (तत्) ते (दूरे) अधर्मात्मा, अविद्वान्, अजितेन्द्रिय

एवा पुरुषोर्थी छेटे छे अर्थात् क्रोडो वरस नीकळी जाय तो पण तेमने प्रा थतुं नथी. (तत्) ते (उ) ज (अन्तिके) धर्मात्मा, विद्वान् योगिओनी पा छे. (तत्) ते (अस्य) आ (सर्वस्य) बधा जगतना तेमज जीवोन (अन्तः) अंदर छे (तत्, उ,) अने ते (अस्य) आ (सर्वस्य) प्रत्य अने अप्रत्यक्षरूपी जगतनी (बाह्यतः) बहार पण विद्यमान छे ॥ ५ ॥

गुजराती भावार्थ—हे माणसो, मूर्ख लोक समजेछे के ते ब्रह्म चलायमान होयछे परन्तु खरेखर जोतां ते पोते सर्वव्यापक होवाथी कोई वखते पण चला यमान थई शकतुं नथी. जे माणसो तेनी आज्ञाथी विरुद्ध आचरण करे छे तेओ आमतेम दोडादोड भले करे परन्तु ते परमात्माने जाणी शकता नथ अने जे तेनी आज्ञानीमाफक वर्तन करे छे ते पोताना आत्मामां रहेला अति समीपस्थ एवा ब्रह्मने प्राप्त थायछे. जे ब्रह्म प्रकृत्यादि सर्व जगतनी अंदर तेमज बाहर व्यापक थई अन्तर्यामिरूपथी बधा जीवोनां सारां नरसां कामो जाणी तेमनुं यथायोग्य फळ आपे छे. बधाए एज वातने ध्यानमां राखी ते परमेश्वरथी डरवुंज जोईए ॥ ५ ॥

यस्त्वित्यस्य दीर्घतमा ऋषिः, आत्मादेवता, निचृदनुष्टुप् छन्दः, गांधारः स्वरः ॥

अथेश्वरविषयमाह.

गुजराती—हवे ईश्वरनेविषे कहेछे.

यस्तु सर्वाणि भूतान्यात्मन्नेवानु पश्यति
सर्वभूतेषु चात्मानं ततो न विचिकित्सति ॥ ६ ॥

पदपाठ—यः, तु, सर्वाणि, भूतानि, आत्मन्, एव, अनुपश्यतीत्यनुऽपश्यति, सर्वभूतेष्विति सर्वऽभूतेषु, च, आत्मानम्, ततः, न, वि, चिकित्सति ॥ ६ ॥

पदार्थः—(यः) विद्वान्जनः (तु) पुनरर्थे (सर्वाणि) अखिलानि (भूतानि) प्राण्यप्राणिरूपाणि (आत्मन्) परमात्मनि (एव) (अनुपश्यति) विद्याधर्मयोगाभ्यासानन्तरं समीक्षते (सर्वभूतेषु) सर्वेषु प्रकृत्यादिषु (च) (आत्मानम्) अवति सुवेन व्याप्नोति तम् (ततः) तदनन्तरं (न) (वि) (चिकित्सति) संशयं प्राप्नोति ॥ ६ ॥

अन्वयः—(हे मनुष्याः) य आत्मन्नेव सर्वाणि भूतान्यनु पश्यति (यः) तु सर्वभूतेष्वात्मानंच (समीक्षते) (स) ततो न विचिकित्सति (इति यूयं विजानीत.) ॥ ६ ॥

भावार्थः—हे मनुष्याः ये सर्वव्यापिनं न्यायकारिणं सर्वज्ञं सनातनं सर्वात्मानं सकलस्य द्रष्टारं परमात्मानं विदित्वा सुखदुःखहानिलाभेषु स्वात्मवत् सर्वाणि भूतानि विज्ञाय धार्मिका जायन्ते तएव मोक्षमश्नुवते ॥ ६ ॥

गुजराती अन्वितार्थ—हे माणसो (यः) जे विद्वान् पुरुष. (आत्मन्) परमात्मामां (एव) ज (सर्वाणि) बधा (भूतानि) प्राणि तथा अप्राणिओने (अनुपश्यति) विद्याध्ययन, धर्माचरण, अने योगाभ्यास कर्या पछी ज्ञानदृष्टीथी जुवे छे. (तु) अने जे (सर्वभूतेषु) बधा प्रकृत्यादि पदार्थोमां (आत्मानं) आत्माने जुवे छे ते विद्वान् पुरुष (ततः) त्यार पछी (न, वि, चिकित्सति) संशयमां पडतो नथी एम तमे समजो ॥ ६ ॥

गुजराती भावार्थ—हे माणसो ! जे पुरुषो सर्वव्यापी, न्यायकारी, सर्वज्ञ, सनातन, सौना आत्मा अर्थात् अन्तर्यामी, सर्वद्रष्टा एवा परमात्माने जाणीने, सुख, दुःख, हानि, तथा लाभमां पोतानी माफक बधा प्राणियोने समजी धर्मात्मा थायछे तेज मुक्तीने पामेछे ॥ ६ ॥

यस्मिन्नित्यस्य दीर्घतमाऋषिः, आत्मादेवता निचृदनुष्टुप् छन्दः, गांधारः स्वरः ॥

अथ केऽविद्यादिदोषान् जहतीत्याह.

गुजराती—हवे कोण अविद्यादि दोषोने तजेछे तेविषे कहेछे.

यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः

तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ ७ ॥

पदानि—यस्मिन्, सर्वाणि, भूतानि, आत्मा, एव, अभूत्, विजानतऽ इति विऽजानतः, तत्र, कः, मोहः, कः, शोकः, एकत्वमित्येकऽत्वम्, अनुपश्यतऽ इत्यनुपश्यतः ॥ ७ ॥

पदार्थः—(यस्मिन्) परमात्मनि ज्ञाने विज्ञाने धर्मे वा (सर्वाणि) (भूतानि) (आत्मा) आत्मवत् (एव) (अभूत्) भवन्ति अत्र वचन-

व्यत्ययेनैकवचनम् (विजानतः) विशेषेण समीक्षमाणस्य. (तत्र) तस्मिन् परमात्मनि स्थितस्य (कः) (मोहः) मूढावस्था (कः) (शोकः) परितापः (एकत्वं) परमात्मनोऽद्वितीयत्वम्. (अनुपश्यतः) अनुकूलेन योगाभ्यासेन साक्षात् द्रष्टुः ॥ ७ ॥

अन्वयः—(हे मनुष्याः) यस्मिन् (परमात्मनि) विजानतः सर्वाणि भूतानि आत्मैवाभूत्, तत्र एकत्वमनुपश्यतः (योगिनः) को मोहः कः शोकः. ॥७॥

गुजराती अन्वितार्थः—हे माणसो (यस्मिन्) जे परमात्मा, ज्ञान, विज्ञान वा धर्ममां (विजानतः) विशेषे करी ध्यानदृष्टिथी जोवावाळा पुरुषने (सर्वाणि) बधा (भूतानि) प्राणिमात्र (आत्मा, एव) आपणा जेवा सुखदुःखवाळा, (अभूत्) थायछे. (तत्र) ते परमात्मादिकोमां (एकत्वं) अद्वितीय भावने (अनुपश्यतः) अनुकूल योगाभ्यासथी साक्षात् जोवावाळा योगिजनने (कः, मोहः) शेनो मोह (कः शोकः) अने शेनो शोक होय ? शोक मोहादिक कांईपण थतुं नथी. ॥ ७ ॥

गुजराती भावार्थः—जे विद्वान् संन्यासी लोको परमात्माना सहचारी प्राणिमात्रने पोताना आत्मानी पेठे जाणेछे, अर्थात् जेम पोतानुं भलुं चहायछे तेम पारकानुं पण करे छे अने एक अद्वितीय परमात्माने शरणे आवेला छे तेमने मोह शोक अने लोभादिक कोई वखते पण थतां नथी, जे माणसो पोताना आत्माने सारी पेठे जाणी परमात्माने जाणेछे ते सदैव सुखी होयछे. ॥ ७ ॥

सपर्यगादित्यस्य दीर्घतमाऋषिः । आत्मादेवता, स्वराड् जगती छन्दः । निषादः स्वरः ॥

पुनः परमेश्वरः कीदृश इत्याह.

गुजराती—फरी परमेश्वर केवो छे तेविषे कहेछे.

स पर्यगाच्छुक्रमकायमव्रण
मस्नाविरꣳशुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयम्भू
र्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः॥८

पदानि—सः, परि, अगात्, शुक्रम्, अकायम्, अव्रणम्, अस्नाविरम्, शुद्धम्, अपापविद्ध मित्यपापऽविद्धम्, कविः, मनीषी, परिभूरिति परिऽभूः, स्वयम्भूरिति स्वयम्ऽभूः, याथातथ्यतऽइति याथाऽतथ्यतः, अर्थान्, वि, अदधात्, शाश्वतीभ्यः, समाभ्यः ॥ ८ ॥

पदार्थः—(सः) परमात्मा (परि) सर्वतः (अगात्) व्याप्तोऽस्ति (शुक्रम्) आशुकरं सर्वशक्तिमत्, (अकायम्) स्थूलसूक्ष्मकारणशरीररहितम् (अव्रणम्) अच्छिद्रं अच्छेद्यम् (अस्नाविरम्) नाड्यादिसंबंधबन्धरहितम् (शुद्धम्) अविद्यादिदोषरहितत्वात् सदा पवित्रम्. (अपापविद्धम्) यत् पापयुक्तं पापकारि पापप्रियं कदाचिन्न भवति तत् (कविः) सर्वज्ञः (मनीषी) सर्वेषां जीवानां मनोवृत्तीनां वेत्ता (परिभूः) यो दुष्टान् पापिनः परिभवति तिरस्करोति सः. (स्वयम्भूः) अनादिस्वरूपो यस्य संयोगेनोत्पत्तिर्वियोगेन विनाशो मातापितरौ गर्भवासो जन्मवृद्धिक्षयौच न विद्यते. (याथातथ्यतः) यथार्थतया (अर्थान्) वेदद्वारा सर्वपदार्थान् (वि) विशेषेण (अदधात्) विधत्ते (शाश्वतीभ्यः) सनातनीभ्योऽनादिस्वरूपाभ्यः स्वस्वरूपेणोत्पत्तिविनाशरहिताभ्यः (समाभ्यः) प्रजाभ्यः ॥ ८ ॥

अन्वयः—(हे मनुष्याः) (यत् ब्रह्म) शुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धं पर्यगात्. (यः) कविः मनीषी परिभूः स्वयम्भूः (परमात्मा) शाश्वतीभ्यः समाभ्यः याथातथ्यतः अर्थात् व्यदधात् सः (एव युष्माभिः उपासनीयः) ॥ ८ ॥

भावार्थः—हे मनुष्याः यदि अनन्तशक्तिमत् अजं निरंतरं सदा मुक्तं न्यायकारि निर्मलं सर्वज्ञं सर्वस्य साक्षि नियन्तृ अनादिस्वरूपं ब्रह्म कल्पादौ जीवेभ्यः स्वोक्तैर्वेदैः शब्दार्थसम्बन्धविज्ञापिकां विद्यां नोपदिशेत् तर्हि कोपि विद्वान् न भवेत् नच धर्मार्थकाममोक्षफलं प्राप्तुं शक्नुयात्. तस्मात् तदेव सदैव उपाध्वम् ॥८॥

गुजराती अन्वितार्थः—हे माणसो! जे ब्रह्म (शुक्रम्) शीघ्रकारी सर्वशक्तिमान् (अकायम्) स्थूल सूक्ष्म अने कारण शरीरथी रहित. (अव्रणम्) छिद्ररहित अने अच्छेद्य (अस्नाविरम्) नाडी वगेरेनी साथे जे संबंधरूपी बंध छे तेथी रहित (शुद्धम्) अविद्यादिदोषरहित अर्थात् सदा पवित्र (अपापवि-

द्धम्) जे पापयुक्त, पापकरवावाळुं, पापमां प्रीती राखवावाळुं कोई वखते थई शकतुं नथी (पर्यगात्) चोतरफथी व्यापक छे अने जे (कविः) सर्वज्ञ (मनीषी) बधा जीवोनी मनोवृत्तिने जाणवावाळो (परिभूः) दुष्ट पापीओनो तिरस्कार करवावाळो (स्वयम्भूः) अनादिस्वरूप, संयोगथी जेनी उत्पत्ति नथी अने वियोगथी जेनो विनाश नथी, माता, पिता, गर्भवास, जन्म, वृद्धि, क्षय, ए बधुं जेने नथी एवो परमात्मा. (शाश्वतीभ्यः) सनातन, अनादिस्वरूप, स्वस्वरूपथी उत्पत्ति अने विनाशरहित एवी (समाभ्यः) प्रजाओने माटे (याथातथ्यतः) यथायोग्य रीते (अर्थान्) वेदद्वारा बधा पदार्थोने (व्यदधात्) विशेषतः बनावे छे. तेज परमेश्वरनी उपासना करवी तमने उचित छे ॥ ८ ॥

गुजराती भावार्थ—हे माणसो! जो अनन्तशक्तियुक्त, अजन्मा, निरन्तर, सदामुक्त, न्यायकारी, निर्मल, सर्वज्ञ, सौनो साक्षी, नियन्ता अनादिस्वरूप एवो परमात्मा कल्पना आरंभमां जीवोने पोते कहेला वेदद्वारा शब्द अर्थ अने तेमना संबंधने बतावनावाळी विद्यानो उपदेश न करे तो कोई पण विद्वान् न थाय तेमज धर्म अर्थ काम अने मोक्ष एवा चतुर्विध पुरुषार्थोनुं फळ भोगववाने पण समर्थ न थाय माटे तेज परमात्मानी सदैव उपासना करो ॥ ८ ॥

अन्धन्तम इत्यस्य दीर्घतमाऋषिः आत्मादेवता, अनुष्टुप् छन्दः, गान्धारः स्वरः ॥

के जना अन्धन्तमः प्राप्नुवन्तीत्याह.

गुजराती—कया माणसो अंधकारने प्राप्त थाय छे ते विषे कहेछे.

अन्धन्तमः प्रविशन्ति येऽसंभूति मुपासते
ततो भूय इव ते तमो य उ सम्भूत्या रताः ॥ ९ ॥

पदानि—अन्धम्, तमः, प्र, विशन्ति, ये, असम्भूति मित्यसम्ऽभूतिम्, उपासत इत्युपऽआसते, ततः, भूयऽइवेति भूयः इव, ते, तमः, ये, उँ इत्यूँ, सम्भूत्यामिति सम्ऽभूत्याम्, रताः ॥ ९ ॥

पदार्थः—(अन्धम्) आवरकम् (तमः) अन्धकारम् (प्र) प्रकर्षेण

(विशन्ति) (ये) (असम्भूतिम्) अनाद्यनुत्पन्नं प्रकृत्याख्यं सत्वरजस्तमोगुणमयं जडं वस्तु (उपासते) उपास्यतया जानन्ति (ततः) तस्मात् (भूय इव) अधिकमिव (ते) (तमः) अविद्यामयमन्धकारं (ये) (उ) वितर्केण सह (संभूत्याम्) महदादिस्वरूपेण परिणतायां सृष्टौ (रताः) ये रमन्ते ते॥९॥

अन्वयः—ये (परमेश्वरं विहाय) असंभूतिं उपासते (ते) अन्धन्तमः प्रविशन्ति ये सम्भूत्यां रताः ते उततो भूयइव तमः (प्रविशन्ति)॥ ९॥

भावार्थः—ये जनाः सकलजडजगतोऽनादि नित्यं कारणमुपास्यतया स्वीकुर्वन्ति तेऽविद्यां प्राप्य सदा क्लिश्यन्ति ये च तस्मात् कारणात् उत्पन्नं पृथिव्यादि स्थूलं सूक्ष्मं कार्यकारणाख्यं अनित्यं संयोगजन्यं कार्यं जगत् इष्टं उपास्यं मन्यन्ते ते गाढां अविद्यां प्राप्य अधिकतरं क्लिश्यन्ति तस्मात् सच्चिदानन्दस्वरूपं परमात्मानमेव सर्वे सदा उपासीरन्॥ ९॥

गुजराती अन्वितार्थ—(ये) जे लोको परमेश्वरने तजी (असंभूतिम्) अनादि, अनुत्पन्न, सत्व, रज अने तमोगुणवाळी प्रकृतिरूपी जड वस्तुने (उपासते) उपास्य माने छे ते (अन्धतमः) आवरण करवावाळा अन्धकारने (प्रविशन्ति) सारी रीते प्राप्त थाय छे अने (ये) जे (सम्भूत्याम्) महत्तत्वादि रूपथी परिणामने प्राप्त थयेल सृष्टीमां (रताः) रमी रह्या छे (ते) ते (उ) वितर्कनी साथे (ततः) पेह्ला प्रकृतिनी उपासना करवावाळा करतां पण (भूयइव) अधिकतर एवा (तमः) अविद्यारूपी अन्धकारने प्राप्त थाय छे.

गुजराती भावार्थ—जे माणसो बधा जड जगतना अनादि नित्य एवा कारणने उपास्यभावथी स्वीकार करे छे ते अविद्यामां पडी हमेश दुःखी थाय छे. वळी जे माणसो ते जगत्ना कारणथी उत्पन्न थयेल स्थूल सूक्ष्म कार्य कारणाख्य, अनित्य, संयोगजन्य एवा कार्य पदार्थोने इष्ट उपास्य माने छे, ते गाढ अविद्याने प्राप्त थई वधारे दुःखी थाय छे माटे सौए सच्चिदानंदस्वरूप परमात्मानीज हमेश उपासना करवी जोईये॥ ९॥

अन्यदित्यस्य दीर्घतमा ऋषिः, आत्मादेवता अनुष्टुप् छन्दः, गांधारः स्वरः॥

पुनर्मनुष्याः किं कुर्य्युरित्याह.

गुजराती—फरीथी माणसोए शुं करवुं ते विषे कहेछे.

अन्यदेवाहुः सम्भवा दन्यदाहुरसंभवात्
इति शुश्रुम धीराणां येनस्तद्विचचक्षिरे ॥ १० ॥

पदानि—अन्यत्, एव, आहुः, सम्भवादिति सम्ऽभवात्, अन्यत्, आहुः, असम्भवादित्य संम्ऽभवात्, इति, शुश्रुम, धीराणाम्, ये, नः, तत्, विचचक्षिरऽइति विऽचचक्षिरे १०

पदार्थः—(अन्यत्) कार्यं फलं वा (एव) (आहुः) कथयन्ति (सम्भवात्) संयोगजन्यात् कार्यात् (अन्यत्) भिन्नं (आहुः) कथयन्ति (असम्भवात्) अनुत्पन्नात् कारणात् (इति) अनेन प्रकारेण (शुश्रुम) शृणुमः (धीराणां) मेधाविनां योगिनां विदुषाम् (ये) (नः) अस्मान्प्रति (तत्) तयोर्विवेचनम् (विचचक्षिरे) व्याचक्षते ॥ १० ॥

अन्वयः—(हे मनुष्याः यथा वयं) धीराणां (सकाशात् यद्वचः) शुश्रुम ये नः तत् विचचक्षिरे (ते) सम्भवात् अन्यदेव आहुः असम्भवात् (च) अन्यदाहुः इति (यूयमपि शृणुत) ॥ १० ॥

भावार्थः—हे मनुष्याः यथा विद्वांसः कार्यात्कारणाद्वस्तुनः भिन्नं भिन्नं वक्ष्यमाणं उपकारं गृह्णन्ति ग्राहयन्ति, तद्गुणान् विज्ञाय विज्ञापयन्ति एवमेव यूयमपि निश्चिनुत ॥ १० ॥

गुजराती अन्वितार्थः—हे माणसो ! जेम अमे (धीराणाम्) मेधावी योगी विद्वानोपासेथी जे वचन (शुश्रुम) सांभळिये छिये अने (ये) जेओ (नः) अमोने (तत्) ते (विचचक्षिरे) व्याख्यान आपी कहेछे ते लोक (संभवात्) संयोगजन्य कार्यथी (अन्यत् एव) बीजुंज कार्य अथवा फळ (आहुः) कहेछे अने (असंभवात्) उत्पन्न न होवावाळा कारणथी (अन्यत्) बीजुं (आहुः) कहेछे (इति) एवी वातने तमे पण सांभळो. ॥ १० ॥

गुजराती भावार्थः—हे माणसो ! जेम विद्वान् लोक कार्य वस्तुथी अने कारण वस्तुथी भिन्न भिन्न वक्ष्यमाण उपकारने ग्रहण करी बीजा पासेथी ग्रहण करावे छे, तेमज ते कार्य कारणना गुणोने पोते जाणी बीजाओने समजावे छे, एमज करवानो तमे पण निश्चय करो ॥ १० ॥

संभूतिमित्यस्य दीर्घतमा ऋषिः, आत्मादेवता अनुष्टुप् छन्दः, गान्धारः स्वरः ॥

पुनर्मनुष्यैः कार्यकारणाभ्यां किं किं साधनीयमित्याह.

गुजराती—फरीथी माणसोए कार्यकरणथी शुं शुं साधवुं जोईये ते वि०.

सम्भूतिंच विनाशंच यस्तद्वेदोभयंᳬसह
विनाशेन मृत्युंतीर्त्वा संभूत्यामृत मश्नुते ॥ ११ ॥

पदानि—सम्भूतिमिति सम्ऽभूतिम्, च, विनाशमिति विऽनाशम्, च, यः, तत्, वेद, उभयम्, सह, विनाशेनेति विऽनाशेन, मृत्युं, तीर्त्वा, सम्भूत्येति सम्ऽभूत्या, अमृतम्, अश्नुते ॥ ११ ॥

पदार्थः—(संभूतिम्) सम्भवन्ति यस्यां तां कार्याख्यां सृष्टिम् (च) तस्याः गुणकर्मस्वभावान्, (विनाशम्) विनश्यन्ति अदृश्याः पदार्थाः भवन्ति यस्मिन् (च) तद्गुणकर्मस्वभावान्. (यः) (तत्) (वेद) जानाति (उभयम्) कार्यकारणस्वरूपं जगत् (सह) (विनाशेन) नित्यस्वरूपेण विज्ञातेन कारणेन सह (मृत्युम्) शरीरवियोगजन्यं दुःखम् (तीर्त्वा) उल्लंघ्य (सम्भूत्या) शरीरेन्द्रियान्तःकरणरूपया उत्पन्नया कार्यरूपया धर्म्ये प्रवर्तयित्र्या सृष्ट्या (अमृतं) मोक्षम् (अश्नुते) प्राप्नोति ॥ ११ ॥

अन्वयः—(हे मनुष्याः) यः (विद्वान्) सम्भूतिं च विनाशं च सह उभयं तद्वेद (सः) विनाशेन (सह) मृत्युं तीर्त्वा, सम्भूत्या (सह) अमृतं अश्नुते. ॥ ११ ॥

भावार्थः—हे मनुष्याः कार्यकारणाख्ये वस्तुनी निरर्थके नस्तः किन्तु कार्यकारणयोर्गुणकर्मस्वभावान् विदित्वा धर्मादि–मोक्षसाधनेषु संप्रयोज्य स्वात्मकार्यकारणयोः विज्ञातेन नित्यत्वेन मृत्युभयं त्यक्त्वा मोक्षसिद्धिं संपादयत इति कार्यकारणाभ्यां अन्यदेव फलं निष्पादनीयमिति. अनयोर्निषेधोहि परमेश्वरस्थाने उपासनाप्रकरणे वेदितव्यः ॥ ११ ॥

गुजराती अन्वितार्थः—हे माणसो (यः) जे विद्वान् माणस (संभूतिम्) जेमां बधा पदार्थो उत्पन्न थाय छे एवी कार्यरूपी सृष्टीने (च) तेमज तेना

गुणकर्मस्वभावोने अने (**विनाशम्**) जेमां पदार्थो नष्ट अर्थात् अदृश्य थाय छे एवा कारणरूपी जगतने (**च**) अने तेना गुणकर्मस्वभावोने (**सह**) साथे (**उभयम्**) बेऊ (**तत्**) ते कार्यकारणस्वरूपने (**वेद**) जाणे छे ते विद्वान् (**विनाशेन**) नित्यस्वरूप जाणेला कारणनी साथे (**मृत्युं**) शरीरना वियोगथी थता दुःखने (**तीर्त्वा**) तरीने (**संभूत्या**) शरीर इन्द्रिय अने अन्तःकरणरूपी, उत्पन्न थयेल, धार्मिक कामोमां लगाडवा योग्य, कार्यरूपी सृष्टीनी साथे (**अमृतं**) मोक्षसुखने (**अश्नुते**) प्राप्त थाय छे ॥ ११ ॥

भावार्थः—हे माणसो! कार्यकारणरूपी वस्तुओ निरर्थक नथी, परंतु कार्यकारणना गुणकर्मस्वभावोने जाणीने, तेमने धर्मादि मोक्षसाधनोमां लगाडी, पोताना शरीरसंबंधी कार्यकारणनुं नित्यत्व ध्यानमां लई, मरणनी भीतीने तजी, मोक्षनी सिद्धि करो. एवी रीते कार्य अने कारणनो विचार करी तेथी बीजुं मोक्ष जेवुं फळ उत्पन्न करवुं जोईये. ए कार्यकारणनो निषेध परमेश्वरनी स्थाने जे उपासना करवी ते प्रकरणमां समजवो जोईये ॥ ११ ॥

अन्धन्तम इत्यस्य दीर्घतमा ऋषिः, आत्मादेवता. निचृदनुष्टुप् छन्दः, गान्धारः स्वरः ॥

अथ विद्याऽविद्योपासनफलमाह.

गुजराती—हवे विद्या अने अविद्यानी उपासनानुं फळ कहे छे.

अन्धन्तमः प्रविशन्ति येऽविद्या मुपासते
ततो भूयइव ते तमो यऽउ विद्या १ रताः ॥ १२ ॥

पदानि—अन्धम्, तमः, प्र, विशन्ति, ये, अविद्याम्, उपासतऽइत्युपऽआसते, ततः, भूयऽइवेति भूयःऽइव, ते, तमः, ये, ऊँऽइत्यूँ, विद्यायाम्, रताः ॥ १२ ॥

पदार्थः—(अन्धम्) दृष्ट्यावरकम् (तमः) गाढमज्ञानम् (**प्र**) (**विशन्ति**) (ये) (**अविद्याम्**) अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येति ज्ञानादिगुणरहितं वस्तु कार्यकारणात्मकं जडं परमेश्वराद्भिन्नम् (उपासते) अभ्यस्यन्ति (ततः) (भूयइव) अधिकमिव (ते) (तमः)

अज्ञानम् (ये) पंडितंमन्यमानाः (उ) (विद्यायाम्) शब्दार्थसंबन्धविज्ञानमात्रे अवैदिके आचरणे (रताः) रममाणाः ॥ १२ ॥

अन्वयः—ये (मनुष्याः) अविद्यां उपासते, (ते) अन्धन्तमः प्रविशन्ति ये विद्यायां रताः ते उ ततो भूयइव तमः (**प्रविशन्ति**) ॥ १२ ॥

भावार्थः—अत्र उपमालंकारः यद्यत् चेतनं ज्ञानादि गुणयुक्तं वस्तु तत् ज्ञातृ, यत् अविद्यारूपं तत् ज्ञेयम्, यच्च चेतनं ब्रह्म विद्वदात्मस्वरूपं वा तत् उपासनीयं सेवनीयं च यदस्मात् भिन्नं तन्नोपासनीयं किन्तु उपकर्तव्यं. ये मनुष्याः अविद्यास्मितारागद्वेषाभिनिवेशैः क्लेशैः युक्ताः ते परमेश्वरं विहाय अतो भिन्नं जडं वस्तु उपास्य महति दुःखसागरे मज्जन्ति. ये च शब्दार्थान्वयमात्रं संस्कृतमधीत्य सत्यभाषणपक्षपातरहितन्यायाचरणाख्यं धर्मं नाचरन्ति, अभिमानारूढाः सन्तो विद्यां तिरस्कृत्य अविद्यामेव मन्यन्ते ते च अधिक तमसि दुःखार्णवे सततं पीडिताः जायन्ते ॥ १२ ॥

गुजराती अन्वितार्थ—(**ये**) जे माणसो (**अविद्याम्**) अनित्य पदार्थने नित्य मानवुं, अशुद्धने शुद्ध, दुःखने सुख, जे आत्मा नहीं तेने आत्मा मानवो एनुं नाम अविद्या, अर्थात् ज्ञानादि गुणरहित परमेश्वर करतां भिन्न कार्यकारणरूपी जे जड वस्तु तेने (उपासते) भजे छे ते माणसो (**अंधन्तमः**) ज्ञाननुं आच्छादन करवावाळा गाढ अज्ञानमां (**प्रविशन्ति**) पेसे छे. अने (ये) जे पोताने डाह्या समजे छे एवा (विद्यायाम्) केवळ शब्द अर्थ अने तेमना संबंधने जाणवुं ए जे अवैदिक कर्म तेमां (**रताः**) रमी रह्या छे (**ते**) ते (उ) तो (ततः) तेनाकरतां (भूय इव) अधिकतर एवा (**तमः**) अज्ञानरूपी अंधकारमां प्रवेश करे छे ॥ १२ ॥

गुजराती भावार्थ—आ मंत्रमां उपमाअलंकार छे. जे जे चेतन अर्थात् ज्ञानादिगुणयुक्त वस्तु छे ते ज्ञातृ अर्थात् जाणवावाळो कहेवाय. जे वस्तु अविद्यारूपी छे ते ज्ञेय अर्थात् जाणवालायक छे. अने जे चेतन ब्रह्म अथवा विद्वाननो आत्मा छे ते उपासनीय छे अर्थात् उपासना करवा योग्य छे. जे एनाकरतां भिन्न छे ते उपास्य नथी किन्तु उपकर्तव्य अर्थात् सुधारवालायक छे. जे माणसो अविद्या अस्मिता राग द्वेष अभिनिवेश नामक क्लेशोथी युक्त ते परमेश्वरने तजी तेनाकरतां भिन्न जे जड वस्तु तेनी उपासना करी मोहोटा दुःखसागरमां डूबे छे. अने जे शब्द अर्थ अन्वय करतां आवडे एटले संस्कृत

अणी सत्यभाषण पक्षपातरहित न्यायाचरणरूपी धर्मनुं आचरण करता नथी अने अभिमानमां मोटे भागे विद्यानो धिःकार करे अने अविद्याने मान आपे ते लो अत्यन्त तमोगुणरूपी दुःखसागरमां पडी हमेश दुःखी थाय छे ॥ १२ ॥

अन्यदित्यस्य दीर्घतमा ऋषिः, आत्मादेवता अनुष्टुप् छन्दः, गान्धारः स्वरः ॥

अथ जडचेतनयोर्विभागमाह.

गुजराती—हवे जड अने चेतनना भेदविषे कहे छे.

अन्यदेवाहुर्विद्याया अन्यदाहुरविद्यायाः
इति शुश्रुम धीराणां येनस्तद्विचचक्षिरे ॥ १३ ॥

पदानि—अन्यत्, एव, आहुः, विद्यायाः, अन्यत्, आहुः, अविद्यायाः, इति, शुश्रुम, धीराणाम्, ये, नः, तत्, विचचक्षिरऽइति विऽचचक्षिरे ॥ १३ ॥

पदार्थः—(अन्यत्) अन्यदेव कार्यं फलं वा (एव) (आहुः) कथयन्ति (विद्यायाः) पूर्वोक्तायाः (अन्यत्) (आहुः) (अविद्यायाः) पूर्वमंत्रेण प्रतिपादितायाः (इति) (शुश्रुम) श्रुतवन्तः (धीराणाम्) आत्मज्ञानां विदुषां सकाशात् (ये) (नः) अस्मभ्यम् (तत्) विद्याविद्याजं फलं द्वयोः स्वरूपं वा (विचचक्षिरे) व्याख्यातवन्तः ॥ १३ ॥

अन्वयः—(हे मनुष्याः) ये (विद्वांसः) नः विचचक्षिरे विद्यायाः अन्यत् आहुः अविद्यायाः अन्यदेव आहुः इति (तेषां) धीराणां तत् (वचः) (वयं) शुश्रुम (इति) विजानीत ॥ १३ ॥

भावार्थः—ज्ञानादिगुणयुक्तस्य चेतनस्य सकाशात् य उपयोगो भवितुं योग्यो न स अज्ञानयुक्तस्य जडस्य सकाशात् यच्च जडात् प्रयोजनं सिध्यति न तच्चेतनादिति सर्वैर्मनुष्यैर्विद्वत्संगेन विज्ञानेन योगेन धर्माचरणेन च अनयोर्विवेकं कृत्वा उभयोरुपयोगः कर्तव्यः ॥ १३ ॥

गुजराती अन्वितार्थ—हे माणसो (ये) जे विद्वान् लोको (नः) अमारेमाटे (विचचक्षिरे) व्याख्यानपूर्व कहेता हता तेओ (विद्यायाः)

पूर्वोक्त विद्यानुं (अन्यत्) बीजुंज कार्य अथवा फळ (आहुः) कहेछे अने (अविद्यायाः) पूर्व मंत्रमां वर्णवेल अविद्यानुं (अन्यत् एव) बीजुंज फळ (आहुः) कहे छे (इति) एवीरीते ते (धीराणाम्) आत्मज्ञानी विद्वानो- पासेथी (तत्) ते वातने अने (शुश्रुम) सांभळता आव्या छिये एम तमे समजो ॥ १३ ॥

गुजराती भावार्थ—ज्ञानादिगुणयुक्त चेतनथी जे उपयोग थवा योग्य छे, ते अज्ञानयुक्त जड पदार्थथी कोई वखते थवानो नथी. अने जे प्रयोजन जड पदार्थथी सिद्ध थई शके छे, ते चेतनथी थवानुं नथी, माटे बधा माणसोए विद्वानोनो संग करी, विज्ञान मेळवी योगाभ्यास अने धर्माचरणथी जड अने चेतननो विचार करी बेऊनो उपयोग करवो ॥ १३ ॥

विद्यामित्यस्य दीर्घतमा ऋषिः, आत्मादेवता. स्वराडुष्णिक् छन्दः, ऋषभः स्वरः ॥

पुनस्तमेव विषयमाह.

गुजराती—फरीथी तेज विषयने कहेछे.

विद्यां चाविद्यां च यस्तद्वेदोभयंᳫसह
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥ १४ ॥

पदानि—विद्याम्, च, अविद्याम्, च, यः, तत्, वेद, उभयम्, सह, अविद्यया, मृत्युम्, तीर्त्वा, विद्यया, अमृतम्, अश्नुते ॥ १४ ॥

पदार्थः—(विद्यां) पूर्वोक्ताम् (च) तत्संबन्धि साधनोपसाधनम्, (अविद्याम्) प्रतिपादितपूर्वाम् (च) एतदुपयोगिसाधनकलापम् (यः) (तत्) (वेद) विजानीत (उभयम्) (सह) (अविद्यया) शरीरादि जडेन पदार्थसमूहेन कृतेन पुरुषार्थेन (मृत्युम्) मरणदुःखभयम् (तीर्त्वा) उल्लंघ्य (विद्यया) आत्मशुद्धान्तःकरणसंयोगधर्मजनितेन यथार्थदर्शनेन (अमृतम्) नाशरहितं स्वस्वरूपं परमात्मानं वा (अश्नुते) ॥ १४ ॥

अन्वयः—यः (विद्वान्) विद्यां च अविद्यां च तत् उभयं सह वेद (सः) अविद्यया मृत्युं तीर्त्वा, विद्यया अमृतं अश्नुते ॥ १४ ॥

भावार्थः—ये मनुष्याः विद्याविद्ये स्वरूपतो विज्ञाय, अनयोर्जडचेतने साधके वर्तेते इति निश्चित्य, सर्वं शरीरादि जडं चेतनमात्मानं च धर्मार्थकाममोक्षसिद्धये सहैव संप्रयुञ्जते, ते लौकिकं दुःखं विहाय, पारमार्थिकं सुखं प्राप्नुवन्ति. यदि जडं प्रकृत्यादि कारणं शरीरादि कार्यं वा न स्यात् तर्हि परमेश्वरो जगदुत्पत्तिं जीवः कर्मोपासने ज्ञानं च कर्तुं कथं शक्नुयात् ? तस्मान्न केवलेन जडेन नच केवलेन चेतनेन अथवा न केवलेन कर्मणा न केवलेन ज्ञानेन च कश्चिदपि धर्मादिसिद्धिं कर्तुं समर्थो भवति ॥ १४ ॥

गुजराती अन्वियार्थ—(यः) जे विद्वान् पुरुष (विद्याम्) पूर्वोक्त विद्या (च) अने तेना साधन अने उपसाधन, (अविद्याम्) तेमज पूर्वे कहेली अविद्या (च) अने तेने उपयोगी थाय एवां साधनो. (तत् उभयम्) आ बन्नेने (सह) साथे (वेद) जाणे छे ते (अविद्यया) शरीरादि जड पदार्थोना समुदायथी करेल पुरुषार्थथी (मृत्युम्) मरणना दुःखनो बोजाने (तीर्त्वा) तरीने (विद्यया) आत्मा अने शुद्ध अन्तःकरणनो संयोग थवाथी जे धर्म प्रगट थाय छे ते धर्मद्वारा थता यथार्थ दर्शनथी (अमृतम्) नाशरहित पोताना स्वरूपने अथवा परमात्माने (अश्नुते) प्राप्त थायछे ॥१४॥

गुजराती भावार्थ—जे माणसो विद्या अने अविद्यानुं शुं स्वरूप छे ते जाणी, एमनां जड अने चेतन आ बे साधनो छे एवो निश्चय करी, बधा शरीरादि जडपदार्थ अने चेतन एवा आत्माने धर्म अर्थ काम अने मोक्षनी सिद्धीने माटे साथे उपयोग करेछे. ते माणसो लौकिक दुःखोने तजी, पारमार्थिक सुख मेळवे छे. जो जड प्रकृति वगेरे कारण तेमज शरीरादि कार्य न होय तो परमेश्वर जगतनी उत्पत्ति केम करी शके ? अने जीवात्मा कर्म उपासना अने ज्ञान पण शीरीते संपादन करे ? माटे केवल जडथी अथवा केवल चेतनथी, कांतो केवल कर्मथी अथवा केवळ ज्ञानथी कोईपण धर्मादि कामोनी सिद्धि करी शकता नथी ॥ १४ ॥

वायुरित्यस्य दीर्घतमा ऋषिः, आत्मादेवता. स्वराडुष्णिक् छन्दः, ऋषभः स्वरः ॥

अथ देहान्ते किं कार्यमित्याह.

गुजराती—हवे देहान्तसमये शुं करवुं जोईये तेविषे कहे छे.

वायुरनिलममृत मथेदं भस्मान्त१शरीरम
ओ ३ म क्रतो स्मर क्लिबे स्मर कृत९ स्मर ॥ १५ ॥

पदानि—वायुः, अनिलम्, अमृतम्, अथ, इदम्, भस्मान्तमिति भस्मऽअन्तम्, शरीरम्, ओ ३ म्, क्रतो इति क्रतो, स्मर, क्लिबे, स्मर, कृतम्, स्मर ॥ १५ ॥

पदार्थः—(**वायुः**) धनंजयादिरूपः (**अनिलम्**) कारणरूपं वायुं (**अमृतम्**) नाशरहितं कारणम् (**अथ**) (**इदम्**) (**भस्मान्तम्**) भस्म अन्ते यस्य तत् (**शरीरम्**) यच्छीर्यते हिंस्यते तदाश्रयम् (**ओ३म्**) एतन्नामवाच्यं ईश्वरं (**क्रतो**) यः करोति जीवस्तत्संबुद्धौ (**स्मर**) पर्यालोचय (**क्लिबे**) स्वसामर्थ्याय. (**स्मर**) (**कृतम्**) यदनुष्ठितम् (**स्मर**) तत् ॥ १५ ॥

अन्वयः—(**हे**) क्रतो (**त्वं**) (**शरीरत्यागसमये**) ओ३म् स्मर क्लिबे (**परमात्मानं स्वस्वरूपं च**) स्मर कृतं स्मर. (**अत्रस्थो**) वायुः अनिलं (**अनिलः**) अमृतं (**धरति**) अथ इदं शरीरं भस्मान्तम् (**भवतीति विजानीत**) ॥ १५ ॥

भावार्थः—मनुष्यैर्यथा मृत्युसमये चित्तवृत्तिर्जायते शरीरादात्मनः पृथग्भावश्च भवति तथैवेदानीमपि विज्ञेयम्. एतच्छरीरस्य भस्मान्ता क्रिया कार्या नातो दहनात्परः कश्चित् संस्कारः कर्तव्यो वर्तमानसमय एकस्य परमेश्वरस्यैवाज्ञापालनमुपासनं स्वसामर्थ्यवर्धनं चैव कार्यम्. कृतं कर्म विफलं न भवतीति मत्वा धर्मे रुचिरधर्मेऽप्रीतिश्च कर्तव्या ॥ १५ ॥

गुजराती अन्वितार्थ—हे (**क्रतो**) कर्म करवावाळा जीव, तुं मरवानी वखते (**ओ३म्**) ए जेनुं नाम छे एवा परमात्मानुं (**स्मर**) स्मरण कर. (**क्लिबे**) पोताना सामर्थ्यने माटे परमात्माने अने पोताना स्वरूपने (**स्मर**) संभार (**कृतम्**) करेला कामने (**स्मर**) संभार आ संसारमांहेलो (**वायुः**) धनंजयादिरूप वायु (**अनिलम्**) कारणरूप वायुने अने कारणरूप वायु

(अमृतम्) अविनाशी एवा कारणने धारण करे छे (अथ) त्यारपछी (इदम्) आ (शरीरम्) नष्ट थवावाळुं सुख दुःखादिकोनुं आश्रयभूत शरीर (भस्मान्तम्) अन्ते भस्म थवानुं छे एम समजो ॥ १५ ॥

गुजराती भावार्थ—मरण समये जेवी चित्तवृत्ति थाय छे अने शरीरथी आत्मा निकळी जाय छे, तेमज हमेश समजी माणसोए विरक्त थवुं जोईये. आ शरीरनी अन्त्येष्टिसुधी संस्काररूपी क्रियाओ करवी बाळीनाख्यापछी शरीरसंबंधी कोईपण संस्कार करवो नहि. वर्तमान समयमां एकला परमेश्वरनीज आज्ञानुं पालन अने उपासना करी पोताना सामर्थ्यमां वधारो करवो. करेलुं काम निष्फल थतुं नथी एम समजी धर्ममां प्रीति अने अधर्ममां अप्रीति करवी ॥ १५ ॥

अग्ने नयेत्यस्य दीर्घतमा ऋषिः, आत्मादेवता, निचृत्त्रिष्टुप् छन्दः, धैवतः स्वरः॥

ईश्वरः काननुगृह्णातीत्याह.

गुजराती—ईश्वर कया माणसोउपर कृपा करे छे तेविषे कहे छे.

अग्ने नय सुपथा राये अस्मान्
विश्वानि देव वयुनानि विद्वान्
युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठान्ते नमउक्तिं विधेम ॥ १६ ॥

पदानि—अग्ने, नय, सुपथेति सुऽपथा, राये, अस्मान्, विश्वानि, देव, वयुनानि, विद्वान्, युयोधि, अस्मत्, जुहुराणम्, एनः, भूयिष्ठाम्, ते, नमऽउक्तिमिति नमःऽउक्तिम्, विधेम ॥ १६ ॥

पदार्थः—(अग्ने) स्वप्रकाशस्वरूप करुणामय जगदीश्वर. (नय) गमय. (सुपथा) धर्म्येण मार्गेण (राये) विज्ञानाय धनाय [illegible] (अस्मान्) जीवान् (विश्वानि) अखिलानि (देव) दिव्यस्वरूप (वयुनानि) प्रशस्यानि ज्ञानानि × वयुनमिति प्रशस्यना॰ निघं॰ ३—८ प्रज्ञानामसु निघं॰ ३—९×

(**विद्वान्**) यः सर्वं वेत्ति सः (**युयोधि**) पृथक् कुरु (**अस्मत्**) अस्माकं सकाशात् (**जुहुराणम्**) कौटिल्यम् (**एनः**) पापाचरणम्. (**भूयिष्ठाम्**) बहुतमाम् (**ते**) तुभ्यम् (**नमउक्तिम्**) सत्कारपुरःसरां प्रशंसाम् (**विधेम**) परिचरेम ॥ १६ ॥

अन्वयः—(हे) देव अग्ने (**परमेश्वर यतः वयम्**) ते भूयिष्ठां नमउक्तिं विधेम (**तस्मात्**) विद्वान् त्वं अस्मत् जुहुराणं एनः युयोधि अस्मान् राये सुपथा विश्वानि वयुनानि नय ॥ १६ ॥

भावार्थः—ये सत्यभावेन परमेश्वरमुपासते, यथासामर्थ्यं तदाज्ञां पालयन्ति, सर्वोपरि सत्कर्तव्यं परमात्मानं मन्यन्ते तान् दयालुरीश्वरः पापाचरणमार्गात् पृथक्कृत्य धर्म्य-मार्गे चालयित्वा विज्ञानं दत्वा धर्मार्थकाममोक्षान् साद्धुं समर्थान् करोति. तस्मात् सर्वे एकं अद्वितीयं ईश्वरं विहाय कस्यापि उपासनं कदाचिन्नैव कुर्युः ॥ १६ ॥

गुजराती अन्वियार्थ—हे (**देव**) दिव्यस्वरूप (**अग्ने**) प्रकाशस्वरूप करुणामय जगदीश्वर जेथी अमे (**ते**) तमारेमाटे (**भूयिष्ठाम्**) अधिकतर (**नमउक्तिम्**) सत्कारपूर्वक प्रशंसाने (**विधेम**) सेवन करिये तेथी (**विद्वान्**) सोने जाणवावाळा एवा आप (**अस्मत्**) अमाराथी (**जुहुराणम्**) कुटिलतारूप (**एनः**) पापाचरणने (**युयोधि**) छेटे राखो. (**अस्मान्**) अमोने (**राये**) विज्ञान, धन, अथवा धनथी थता सुखने माटे (**सुपथा**) धर्मानुकुळ मार्गथी (**विश्वानि**) बधा (**वयुनानि**) सारा ज्ञानोने (**नय**) प्राप्त करो ॥ १६ ॥

गुजराती भावार्थ—जे सत्यभावथी परमात्मानी उपासना करे छे, पोताना सामर्थ्यमुजब तेनी आज्ञानुं पालन करे छे. सौकरतां सत्कार करवालायक परमात्माने माने छे. ते माणसोने दयालु ईश्वर पापाचरणमार्गथी दूर करी धर्मने लगता मार्गे चलावी, सारुं ज्ञान आपी धर्म अर्थ काम अने मोक्षने मेळववायोग्य एवा बनावे छे. माटे एक अद्वितीय एवा ईश्वरने मुकी बीजा कोईनीपण उपासना कोई वखते न करवी ॥ १६ ॥

हिरण्मयेनेत्यस्य दीर्घतमा ऋषिः, आत्मादेवता. अनुष्टुप् छन्दः, गान्धारः स्वरः ॥

अथान्ते मनुष्यानीश्वर उपदिशति.

गुजराती—हवे अन्तमां ईश्वर माणसोने उपदेश आपे छे.

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्
योऽसावादित्ये पुरुषः सोऽसावहम् ॥
ओ ३ म् खं ब्रह्म ॥ १७ ॥

पदानि—हिरण्मयेन, पात्रेण, सत्यस्य, अपिहितमित्यपिऽहितम्, मुखम्, यः, असौ, आदित्ये, पुरुषः, सः, असौ, अहम्, ओ ३ म्, खम्, ब्रह्म ॥ १७ ॥

पदार्थः—(हिरण्मयेन) ज्योतिर्मयेन (पात्रेण) रक्षकेण (सत्यस्य) अविनाशिनः यथार्थस्य कारणस्य (अपिहितम्) आच्छादितम् (मुखम्) मुखवदुत्तमाङ्गम् (यः) (असौ) (आदित्ये) प्राणे सूर्यमण्डले वा (पुरुषः) पूर्णः परमात्मा (सः) (असौ) (अहम्) (ओ३म्) योऽवति सकलं जगत्तदाख्या (खम्) आकाशवत् व्यापकम् (ब्रह्म) सर्वेभ्यो गुणकर्मस्वभावतो बृहत् ॥ १७ ॥

अन्वयः—(हे मनुष्याः) (येन) हिरण्मयेन पात्रेण (मया) सत्यस्यापिहितं मुखं (विकाश्यते) योऽसावादित्ये पुरुषः (अस्ति) सोसावहं खं ब्रह्म (अस्मि) ओम् (इति विजानीत) ॥ १७ ॥

भावार्थः—सर्वान् मनुष्यान् प्रति ईश्वर उपदिशति, हे मनुष्याः योऽहमत्रास्मि, स एवान्यत्र सूर्यादौ, योन्यत्र सूर्यादावस्मि स एवात्रास्मि, सर्वत्र परिपूर्णः खवद्व्यापकः, न मत्तः किंचित् अन्यत् बृहत्, अहमेव सर्वेभ्यो महानस्मि, मदीयं सुलक्षणपुत्रवत् प्राणप्रियं निजस्य नाम ओ३म् इति वर्त्तते, यो मम प्रेमसत्याचरणभावाभ्यां शरणं गच्छति, तस्य अन्तर्यामिरूपेण अहमविद्यां विनाश्य, तदात्मानं प्रकाश्य, शुभगुणकर्मस्वभावं कृत्वा, सत्यस्वरूपावरणं स्थापयित्वा, शुद्धं योगजं विज्ञानं दत्वा, सर्वेभ्यो दुःखेभ्यः पृथक्कृत्य, मोक्षसुखं प्रापयामीति ओ३म् ॥ १७ ॥

अत्रेश्वरगुणवर्णनमधर्मत्यागोपदेशः सर्वदा सत्कर्मानुष्ठानावश्यकत्वमधर्माचरणनिन्दा परमेश्वरस्यातिसूक्ष्मस्वरूपवर्णनं विदुषां ज्ञेयत्वमविदुषामविज्ञेयत्वं सर्वत्रात्मभावेनाहिंसाधर्मपालनं तेन मोहशोकादित्यागः ईश्वरस्य जन्मादिदोषराहित्यं वेदविद्योपदेशनं कार्यकारणात्मकस्य जडस्योपासननिषेधः ताभ्यां कार्यकारणाभ्यां मृत्युं निवार्य मोक्षसिद्धिकरणं जडवस्तुन उपासनानिषेधः चेतनोपासनाविधिः तदुभयस्वरूपविज्ञानावश्यकत्वं शरीरस्वभाववर्णनं समाधिना परमेश्वरमात्मनि निधाय शरीरत्यागकरणं शरीरदाहादूर्ध्वं अन्यक्रियानुष्ठाननिषेधः अधर्मत्यागाय धर्मवर्धनाय परमेश्वरप्रार्थनं ईश्वरस्वरूपवर्णनं सर्वेभ्यो नामभ्य ओ३मित्यस्य प्राधान्यप्रतिपादनं च कृतं अतः एतदर्थस्य पूर्वाध्यायोक्तार्थेन सह संगतिरस्तीति वेद्यम् ॥ १७ ॥

गुजराती अन्विताऽर्थः—हे माणसो ! जे (**हिरण्मयेन**) ज्योतिःस्वरूपी (**पात्रेण**) रक्षण करवावाळा एवा माराथी (**सत्यस्य**) अविनाशी यथार्थ एवा कारणनुं (**अपिहितम्**) ढंकायलुं (**मुखम्**) मोढानीमाफक जे उत्तमांग तेनो प्रकाश करवामां आवे छे (**यः**) जे (**असौ**) आ (**आदित्ये**) प्राण अथवा सूर्यमण्डलमां (**पुरुषः**) पूर्ण एवो परमात्मा छे (**सः**) ते (**असौ**) परोक्षरूप (**अहम्**) हुं (**खम्**) आकाशनी माफक व्यापक (**ब्रह्म**) बधा करतां गुणकर्मस्वभावथी अधिक एवो हुं छुं (**ओ३म्**) सौनो रक्षक जे हुं ते मारुं नाम ओ३म् एवुं छे एम जाणो ॥ १७ ॥

गुजराती भावार्थ—ईश्वर बधा माणसोने उपदेश करे छे के, हे माणसो ! जे हुं अत्रे छुं तेज बीजा सूर्यादिलोकमां अने जे सूर्यादिलोकमां तेज हुं अत्रे छुं, सर्वत्र परिपूर्ण आकाशनीपेठे व्यापक एवो माराकरतां बीजो कोई मोहोटो नथी, हुंज सौथी मोहोटो छुं, मारुं सुलक्षण पुत्रनीमाफक प्राण करतां वहालुं पोतानुं नाम ओ३म् एवुं छे, प्रेम अने सत्याचरण भावथी जे मारे शरणे आवे छे, हुं अन्तर्यामीस्वरूपथी तेनी अविद्यानो नाश करी, तेना आत्माने प्रकाशित करी, शुभ गुणकर्मस्वभाववाळो बनावी, सत्यस्वरूपना आवरणने स्थिर करी, शुद्ध योगथी उत्पन्न थता विज्ञानने आपी, बधा दुःखोथी अलग करी मोक्षसुख आपुं छुं इति ॥ १७ ॥

आ अध्यायमां ईश्वरना गुणोनुं वर्णन, अधर्मत्यागनो उपदेश, सर्वदा सारां कामो करवानी आवश्यकता, अधर्माचरणनी निन्दा, परमेश्वरना अति सूक्ष्म स्व-

स्वरूपनुं वर्णन, विद्वानोज ईश्वरने जाणी शके, अविद्वानो नथी जाणता, सर्वत्र आत्मभावनाथी अहिंसाधर्मनुं पालन, तेथीकरी मोहशोकादिकोनो त्याग, ईश्वर जन्ममरणादि दोषोथी रहित छे, तेणेज वेदविद्यानो उपदेश कर्यो छे, कार्यकारणात्मक जडनी उपासना करवानो निषेध, ते कार्यकारणद्वारा मृत्युमुक्तिनिवारण करी मोक्षसिद्धीनुं विधान, जडवस्तुनी उपासनानो निषेध, चेतननी उपासनानुं विधान, ते बन्नेनुं स्वरूप जाणवानी आवश्यकता, शरीरना स्वभावनुं वर्णन, समाधिद्वारा परमेश्वरने पोताना आत्मामां धारण करी शरीरनो त्याग करवानी आज्ञा, शरीरनो अन्त्येष्टिसंस्कार थया पछी बीजी क्रिया करवानो निषेध, अधर्मना त्यागनेमाटे अने धर्मनी वृद्धिमाटे परमेश्वरनी प्रार्थना; ईश्वरना स्वरूपनुं वर्णन, बधा नामो करतां ओ३म् आ नामनुं प्राधान्य, इत्यादि वर्णन करेलुं छे माटे आ अध्यायनी पूर्वना अध्यायना अर्थनी साथे संगती छे एम समजवुं ॥ १७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां परमविदुषां विरजानन्दसरस्वती-

स्वामिनां शिष्येण श्रीमद्दयानन्दसरस्वतीस्वामिना निर्मिते संस्कृ-

तार्यभाषाभ्यां समन्विते सुप्रमाणयुक्ते यजुर्वेदभाष्ये

चत्वारिंशत्तमोऽध्यायः समाप्तः ॥

समाप्तं च यजुर्वेदभाष्यम्.